"इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः" ।) उत्तरपदे श्रेष्ठवाचकः । इत्यमरः ॥

इभकणा, स्त्री, (इभो हस्तीव कणा ।) गजपिप्पली । इति रत्नमाला ॥ ("कर्पूरं जातिकोषं सजलमिभकणा तेजपत्रं लवङ्गम्" । इति वैद्यकरसेन्द्रसारसंग्रहः ।)

इभदन्ता, स्त्री (इभस्य दन्त इव । इभदन्त + टाप् ।) नागदन्तीवृक्षः । इति रत्नमाला ॥ (नागदन्तीशब्देऽस्या गुणादयो ज्ञेयाः ।)

इभनिमीलिका, स्त्री. (इभस्य हस्तिन इव निमीलिका ।) वैदग्धी । भङ्गिः । इति त्रिकाण्डशेषः ॥

इभपालकः, पुं, (इभानां पालकः ।) हस्तिपकः । इति हेमचन्द्रः ॥ माउत् इति भाषा ।

इभमाचलः, पुं, (इभमाचालयति । इभ + आङ् + चल + णिच् + बाहुलकात् ख ।) सिंहः । इति भूरिप्रयोगः ॥

इभषा, स्त्री, (इभ + षा + क + टाप् ।) स्वर्णक्षीरीवृक्षः । इति रत्नमाला ॥

इभाख्यः, पुं, (इभस्य आख्या यस्मिन् ।) नागकेशरवृक्षः । इति त्रिकाण्डशेषः ॥

इभोषणा, स्त्री, इभकणा । गजपिप्पली । इति शब्दचन्द्रिका ॥ (गजपिप्पलीशब्देऽस्या विवरणम् ज्ञेयम् ।)

इभ्यः, त्रि, (इभमर्हतीति दण्डादित्वात् यत् ।) धनवान् । इत्यमरः ॥ (पुं, राजा । हस्तिपकः ।) (यथा छान्दोग्योपनिषदि ।१।१०। "उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास । सहेभ्यम् कुल्माषान् खादन्तं बिभिक्षे" ।)

इभ्या, स्त्री, हस्तिनी । शल्लकी । इति मेदिनी ॥

इयं, स्त्री, इदम् शब्दस्य स्त्रीलिङ्गे प्रथमायां रूपं । एइ स्त्री इति भाषा । इति व्याकरणम् ॥

इयत्, त्रि, (इदम् परिमाणमस्य । इदम् + वतुप् वस्य यः ।) कियत्संख्यावबोधकम् । इति व्याकरणम् ॥ एतो इति भाषा । (यथा, रघुवंशे ।१३।६७।

"इयन्ति वर्षाणि तया सहोग्रम्-
अभ्यस्यतीव व्रतमासिधारम्" ।)

इयत्ता, स्त्री, (इयत् + तल् ।) इयतो भावः । सीमा । परिमाणम् । सङ्ख्या । इत्यादि ॥ ("अमेय तदशक्त्या वा न गुणानामियत्तया" । इति रघुवंशे । १० । ३२ ।)

इरणं, त्रि, ईरणं । शून्यं । ऊषरभूमिः । इत्यमरटीकायां रमानाथः ॥

इरम्मदः, पुं, (इरया उदकेन माद्यति दीप्यते अविन्धात्वात् इति उग्रम्पश्येरम्मदेत्यादिना खश्प्रत्ययो मुमागमश्च निपातितः ।) वज्राग्निः । तत्पर्य्यायः । मेघज्योतिः २ । इत्यमरः ॥ मेघाग्निः ३ । इति जटाधरः ॥ अन्योन्यसङ्घट्टनेन मेघाग्निरुत्थ यज्ज्योतिर्वज्रादौ पतति सः । मेघेष्वपलक्षणं वाताग्निरपि । इति भरतः ॥

इरा, स्त्री, (इं कामं राति ददाति इति । इ + रा + क । यद्वा एतीति इ + रन् + टाप् निपातनात् गुणाभावः ।) भूमिः । वाक्यम् । मद्यम् । जलम् । इत्यमरः ॥ (यथा, आश्वलायनगृह्यसूत्रे । २ । ६ ।

"इरां वहन्तो घृतमुक्षमाणा
मित्रेण साकं सह संविशन्तु" ।)

सरस्वती । इति शब्दरत्नावली ॥ (अन्नम् ।) कश्यपपत्नीविशेषः । यथा, गारुडे ६ अध्यायः ॥

"धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् । अदितिर्दितिर्दनुः काला अनायुः सिंहिका मुनिः । कद्रुः प्राधा इरा क्रोधा विनता सुरभिः खशा" । तस्याः सृष्टिर्यथा ।

"इरा वृक्षलता वल्ली तृणजातिश्च सर्व्वशः । खशा च यक्षरक्षांसि मुनिरप्सरसस्तथा" ।

(दैत्यविशेषः । यथा, हरिवंशे । ३ । ८२ ।

"मरीचिर्मघवांश्चैव इरा शङ्कुशिरा वृकः" ।)

इराचरं, क्ली, (इरायां चरतीति । इरा + चर् + ट ।) करका । इति त्रिकाण्डशेषः ॥ वृष्टिर शील इति भाषा । जलचरे भूचरे च त्रि ॥

इराजः, पुं, (इरया मद्येन जायते इति । इरा + जन् + ड ।) कन्दर्पः । इति हलायुधः ॥

इरावती, स्त्री, (इरा विद्यतेऽस्या इति । इरा + मतुप् ।) वटपत्रीवृक्षः । पाषाणभेदीविशेषः । इति राजनिर्घण्टः ॥ (नदीभेदः । यथा, महाभारते ।

"विपाशा च शतद्रुश्च चन्द्रभागा सरस्वती । इरावती वितस्ता च सिन्धुर्देवनदी तथा" ॥

इरिणं, क्ली, (ऋच्छतीति । ऋ गतिप्रापणयोः, किदित्वेति इनन् ।) शून्यम् । ऊषरभूमिः । इत्यमरः ॥ (यथा, मनुः । ३ । १४२ ।)

"यथेरिणे वीजमुप्त्वा न वप्ता लभते फलम्" ।)

इरिमेदः, पुं, (इरिणो हस्तिनो मेद इव मेदो यस्य ।) अरिमेदः । विट्खदिरः । इति शब्दरत्नावली राजनिर्घण्टश्च ॥

("इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः" । इति पर्य्यायः । अस्य गुणा यथा भावप्रकाशे ।

"अरिमेदः कषायोष्णो मुखदन्तगदास्रजित् । हन्ति कण्डूविषश्लेष्मक्रिमिकुष्ठविषव्रणान्" ॥)

इरिवेल्लिका, स्त्री, मस्तकोद्भवव्रणजन्यपीडाविशेषः । तस्य लक्षणम् ।

"पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम् । सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम्" ॥ इति निदानम् ॥ चिकित्सा यथा ।

"पैत्तिकस्य विसर्पस्य या चिकित्सा प्रकीर्त्तिता । तयैव भिषगेताञ्च चिकित्सेदिरिवेल्लिकाम्" ॥ इति भावप्रकाशः ॥ (तथा च वाभटः ।

"त्रिलिङ्गा पिटिका वृत्ता जत्रूर्द्ध्वमिरिवेल्लिका" । "इरिवेल्लिकां गन्धनामां जयेत्पित्तविसर्पवत्" । इति वैद्यकचक्रपाणिसंग्रहे ।)

इरेशः, पुं, (इरायाः ईशः ।) विष्णुः । इति शब्दरत्नावली ॥ राजा । वागीशः । वरुणः ॥

इर्व्वारुः, पुं, स्त्री, (उर्व्व + आरु । पृषोदरादित्वात् साधुः ।) कर्कटी । इत्यमरः ॥ काँकुड़ इति भाषा । अस्य गुणाः । स्वादुत्वम् । गुरुत्वं । अजीर्णकारित्वम् । शीतलत्वञ्च । तत्पक्वफलगुणाः । दाहतृष्णाक्लान्तिनाशित्वम् । इति राजवल्लभः ॥ (कर्कटीशब्देऽस्य विशेषो ज्ञातव्यः ।)

इर्व्वारुशुक्तिका, स्त्री, (इर्व्वारुः शुक्तिकेव स्वयं स्फोटनात् ।) इर्व्वारुविशेषः । इति हारावली ॥ फुंटी इति भाषा ।

इर्व्वालुः, पुं, (इर्व्व + आरु । रलयोरैक्यात् ।) इर्व्वारुः । इत्यमरटीकायां रायमुकुटः ॥

इल, श शये, गतौ । क्षेपे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-शयने, अकं-सेट् ।) श इलति । शयः शयनं । इति दुर्गादासः ॥

इल, क क्षेपे । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) ऋखादिः । क एलयति । इति दुर्गादासः ॥

इलविला, स्त्री, कुवेरमाता । सा च विश्रवःपत्नी । इति पुराणम् ॥

इला, स्त्री, (इलति विष्णुवरात् पुंस्त्वं प्राप्नोति इति । इल + क + टाप् ।) वैवस्वतमनुकन्या । सा च विष्णुवरात् पुंस्त्वं प्राप्य सुद्युम्ननाम्ना ख्याता । पश्चात् शङ्करशापकुमारवनं प्रविश्य पुनः स्त्रीत्वं गता । बुधस्तां भार्य्यात्वेन स्वीकृत्य पुरूरवसं जनयामास । ततस्तस्याः पुरोहितो वशिष्ठः शङ्करमाराध्य तस्यै मासं स्त्रीत्वं मासं पुंस्त्वं दत्तवान् इति श्रीभागवतं ॥ कर्द्दमप्रजापतिपुत्त्र इलः कार्त्तिकेयजन्मदेशं प्रविश्य स्त्री भूत्वा इलानाम्ना ख्यातः ततः पार्व्वतीमाराध्य मासं स्त्रीत्वं मासं पुंस्त्वञ्च प्राप्तवान् । इति रामायणं ॥ पृथिवी । गौः । वाक्यं । इति मेदिनी ॥

इलावृतं, क्ली, (इरया आवृतं ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति त्रिकाण्डशेषः । तच्च सुमेरुपर्व्वतं संवेष्ट्यास्ते । तस्य सीमा उत्तरे नीलपर्व्वतः । दक्षिणे निषधः । पश्चिमे माल्यवान् । पूर्व्वे गन्धमादनपर्व्वतः । इति श्रीभागवतम् ॥ आग्नीध्रस्य स्वनामख्यातः पुत्त्रः स तु पितुः सकाशात् इलावृतं नाम वर्षमलभत । यदुक्तं विष्णुपुराणे । २ । १ । १६, १७, १८ ।

"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! । तस्य पुत्त्रा बभूवुस्ते प्रजापतिसमा नव ॥ नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः । रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च ॥ केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत्" ॥)

इलिका, स्त्री, (इला एव । इला + स्वार्थे कन् + टाप् ।) पृथिवी । इति शब्दरत्नावली ॥

इली, स्त्री, (इल गतौ क्षेपणे च इति, कृदिकाराः दिति वा ङीष् ।) ईली । करपालिका । इत्यमरटीकायां रायमुकुटः ॥ छातकुरि इति भाषा ।

इलीशः, पुं, (इलन्ति अप्सु द्रुतं गच्छन्ति इति इला द्रुतगामिनो मत्स्याः । इल + क । तेषां ईशः ।) स्वनामख्यातमत्स्यविशेषः । इति शब्दरत्नावली ॥ ("इलीशो जितपीयूषो वाचा वाचामगोचरः । रोहितो नो हितः प्रोक्तो मद्गुरो मद्गुरोः प्रियः" ॥ इत्युद्भटः ।

"इलीशो मधुरः स्निग्धः पित्तश्लेष्माग्निमान्द्यनुत्" । इति वैद्यकद्रव्यगुणः ॥)